**International Journal of Research in Economics and Social Sciences(IJRESS)**
Available online at: http://euroasiapub.org
Vol. 9 Issue 3, March- 2019
ISSN(o): 2249-7382 | Impact Factor: 6.939
**(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)**

# विभिन्नदर्शनेषु शब्दप्रमाणम्

सुषमा, शोधार्थी

संस्कृत विभाग महर्षि दयान्द विश्वविद्यालय रोहतक

**शोध-आलेखसारः-** शब्दःसम्बन्धे दार्शनिकानां मतवैभिन्र्यं स्वाभाविकमेव विधते आप्तोपदेशःशब्दःइति शब्दलक्षणम् उपदेशः शब्दः पर्यायमात्रोच्चारणात् इति।

**प्रमुखशब्दः** पूर्वमीमांसा, शब्द, उपदेश, विधि, षड्दर्शन, तर्कभाषा, न्यायमधरी, शास्त्रदीपिका, पौरूषेय, अपौरूषेय।

शब्दलक्षणम्- **‘‘शास्त्रं शब्दविज्ञानाद् सन्निकृष्टेऽर्थे विज्ञानम्’’**[1]

शब्दज्ञानजन्यं असन्निकृष्टे= अज्ञाते अबाधिते च अर्थे विज्ञानं शाब्दं ज्ञानम्। शब्दात् पदार्थाभिधानद्वारेण यत् वाक्यार्थविज्ञानं तत् शाब्दं नाम प्रमाणं भवति। उच्यते-

**पदज्ञानं तु करणम्, द्वारं तत्र पदार्थधीः।**

**शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी।।**

शब्द प्रामाण्य लोकप्रसिद्ध एव। शब्द-प्रामाण्यं द्विविधः

1- पौरुषेय- शब्दप्रमाणम् (आप्तवाक्यं)

2- अपौरुषेय- शब्दप्रमाणम् (वेदवाक्यं)

## 1. न्यायसूत्रानुसारेण शब्दलक्षणम्।

‘‘आप्तोपदेशः शब्दः’’ इति सूत्रेण शब्दस्य[2] लक्षणं उवाच, अत्र ‘शब्द:’ इति लक्ष्यनिर्देशः ।

---

[1] शा.भा. 1.1.5, भा. 1.स पृ- 44

[2] न्या.सू. 1.1.7

'आप्तोपदेशः' इति लक्षणम्। 'उपदिश्यतेऽनेनेत्युपदेशः' इति व्युत्पत्त्या आप्तोपदेशशब्देन वाक्यज्ञानं वा तदर्थज्ञानं वा अभिधीयते। तत्र वाक्यं ज्ञायमानं प्रमाणमिति पक्षे वाक्यार्थज्ञानं फलम्। यद्यपि विधिः, उपदेशः, प्रवर्तनमिति पर्याया: उत्कृष्टप्रयोजन वद्वचनमात्रम् अत्र उपदेशशब्देन विवक्षितम्। वार्त्तिककारोऽप्याह ''आप्तोपदेशः शब्दः, न शब्दमात्रमिति सूत्रार्थः''[3] इति।

''आप्तः खलु साक्षात्कृतधर्मा यथादृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्त उपदेष्टा। साक्षात्करणमर्थस्य आप्तिः, तया प्रवर्तत इत्याप्तः'' इति। सुदृढेन प्रमाणेनावधारिताः साक्षात्कृताः धर्माः = हिताहितप्राप्तिपरिहारप्रयोजनाः पदार्थाः, येन स शब्दः। तेषामुपदेशः= तैः उच्चरितम् - आकाङ्क्षायोग्यतासत्तियुक्तपदसमूहात्मकं वाक्यं शब्दः इति शब्दलक्षणमुक्तं भवति।

## 2. न्यायमञ्जर्युक्तं शब्दलक्षणम्

''आप्तोपदेशः शब्दः'' इति शब्दलक्षणम्। 'उपदेशः शब्दः' इत्युच्यमाने पर्यायमात्रोच्चारणात् अकारके बोधाजनके, शब्दमात्रे प्रामाण्यप्रसङ्ग इति तन्निवृत्त्यर्थं पूर्वसूत्रात् साध्यसाधनपदमाकृष्यते।[4] 'साध्यसाधनम्' इत्यस्य करणम् अकारके शब्दे नातिव्याप्तिः। अतः प्रत्यक्षसूत्रात् ज्ञानपदस्य, स्मृतिजनकेऽतिप्रसङ्गवारणाय अर्थग्रहणस्य, संशयविपर्यय जनकनिराकरणाय च व्यवसायात्मकाव्यभिचारिपदयोरनुवृत्तिः ''अव्यभिचारि व्यवसायात्मकम् अर्थविषयकं च ज्ञानं यतः भवति, स उपदेशः शब्दः'' इति फलति।

[3] न्या.वा. 1.1.7, पृ 365

[4] न्या म. आ.3 भा.1 पृ- 396

International Journal of Research in Economics and Social Sciences(IJRESS)
Available online at: http://euroasiapub.org
Vol. 9 Issue 3, March- 2019
ISSN(o): 2249-7382 | Impact Factor: 6.939
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

अनाप्तो पदेशेऽतिव्याप्तिवारणाय तु आप्तपदमावश्यकमेव। अतः यथार्थ प्रतीतिहेतुत्वेन आप्तोपदेशत्वस्यानुमानात्।

### 3. तर्कभाषायां शब्दलक्षणम्

आप्तवाक्यं शब्दः। आप्तस्तु यथाभूतस्यार्थस्योपदेष्टा पुरुषः।[5] वाक्यं तु आकाङ्क्षायोग्यतासंनिधिमतां पदानां समूहः। अतो ‘‘गौरश्वः पुरुषो हस्ती’’ इति पदानि न वाक्यम्, परस्पराकाङ्क्षाविरहात्। ‘‘अग्निना सिञ्चेत्’’ इत्यपि न वाक्यम्, योग्यताविरहात्। यथा-‘‘अग्निना’’ इति तृतीयया सेकरूपं कार्यं प्रति करणत्वमग्रः प्रतिपादितम्। अतः ‘‘अग्निना सिञ्चेत्’’ इति न वाक्यम्। एवमेकैकशः प्रहरे प्रहरेऽसहोच्चारितानि ‘‘गामानय’’ इत्यादिपदानि न वाक्यम्। सत्यामपि परस्पराकाङ्क्षायां, सत्यामपि परस्परान्वययोग्यतायां परस्परसांनिध्याभावात्। यानि तु साकाङ्क्षाणि योग्यतावन्ति संनिहितानि पदानि तान्येव वाक्यम्। यथा ‘‘ज्यो तिष्टोमेन स्वर्गकामो यजेत’’ इत्यादि। यथा च ‘‘नदीतीरे पञ्च फलानि सन्ति’’ इति। यथा च तान्येव ‘‘गामानय’’ इत्यादिपदानि अविलम्बितोञ्चारितानि।

### 4. वेदान्त परिभाषोक्तं शब्दप्रमाणलक्षणम् -

वेदान्ते ‘‘यस्य वाक्यस्य तात्पर्यविषयीभूतसंसर्गो अन्तरेण न बाध्यते, तद वाक्यं प्रमाणम्। शब्द समानार्थके प्रमाणान्तरेऽतिव्याप्ति वारणाय वाक्यत्व निवेशः।

**पदार्थसंसर्ग-**बोधकवाक्यत्वस्य ‘‘अग्निना सिञ्चेत्’’ इत्ययोग्यवाक्येऽपि सत्त्वात् तत्र अति

[5] त.भा.पृ. 47

International Journal of Research in Economics and Social Sciences(IJRESS)
Available online at: http://euroasiapub.org
Vol. 9 Issue 3, March- 2019
ISSN(o): 2249-7382 | Impact Factor: 6.939
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

व्याप्तिवारणाय 'अबाधित' इति संसर्गविशेषणम्। वाक्येषु स्वार्थसंसर्गस्य ''नेह नानास्ति किंचन'' इत्यादिना बाधितत्वात् अव्याप्तिरित्यत उक्तं-मानान्तराबाधितेति तथा च पारमार्थिकतत्त्वावेदः वेदान्तैः घटानयनादिसंसर्गस्य यागस्वर्गादिसाध्यसाधनभावस्य च बाधेऽपि सजातीयैर्व्यावहारिकतत्त्वावेदकैः प्रमाणान्तरैर्बाधाभावान्नाव्याप्तिः । अतः व्यवहारदशायामपि बाधात् 'तात्पर्यविषय' इत्युक्तम् ।

## 5. सांख्यदर्शनोक्तं शब्दलक्षणम्

सांख्यकारिकायां ''दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात् ।[6] त्रिविधं प्रमाणमिष्टम्'' इति प्रमाणत्रैविध्यमुक्त्वा, ''आप्तश्रुतिराप्तवचनं तु''[7] इति आप्त वचनस्य लक्षणमुक्तम् । 'आप्ता = प्राप्ता, युक्तेति यावत् । आप्ता चासौ श्रुतिश्चेत्याप्तश्रुतिः । श्रुतिः= वाक्यजनितं वाक्यार्थज्ञानम्''[8] इति तद्व्याख्यायां कौमुद्याम् उक्तम् ।

श्रुतिशब्दः जहदजहल्लक्षणया शब्दसामान्यपरः । आप्तपदस्य युक्ता - सत्यार्थ बोधनसामर्थ्येन समीचीना, दोषविहीनेति वा अर्थः। तथा च निर्दोषवाक्यजन्यं वाक्यार्थज्ञानम् आगमप्रमाणमित्युक्तं भवति । शब्दस्य प्रमाणत्वे तु निर्दोषवाक्यं शब्द इति फलति ।

## 3- मीमांसाशास्त्रोक्तं शब्दप्रमाणलक्षणम् -

''औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धः...'' इति सूत्रे प्रत्यक्षादिषट्प्रमाणानां लक्षणं भवति भाष्यकारः शब्दप्रमाणलक्षणकथनावसरे शब्दविशेषस्य शास्त्रस्य

[6] सा.का. 4

[7] सा.का. 5

[8] सा.त.कौ.4- पृ- 153

लक्षणमुक्तवान्।

‘‘शास्त्रं शब्दविज्ञानादसंनिकृष्टेऽर्थे विज्ञानम्’’ इति। शास्त्रशब्देनात्र पंकजादि पदवत् योगरूढ्या धर्माधर्मोपदेशीनि चतुर्दश अष्टादश वा विद्यास्थानान्युच्यन्ते । ‘शब्दविज्ञानात्’ इत्यत्र शब्दशब्देन सामान्यवाचिना प्रकृतत्वात् चोदना अभिव्यञ्जयते। अर्थशब्देन धर्माधर्मावभिधीयते। प्रमाणान्तरागम्य धर्माधर्मविषयकज्ञानजनकज्ञानविषयत्वे सति चोदनात्वं शास्त्रलक्षणमिति फलितम् । शास्त्रपदम् अपनीय शब्दपदनिक्षेपे शास्त्रतदितरशब्दसामान्यलक्षणमपि लभ्यते भाष्यात् । तथा हि-

**‘‘असंनिकृष्टवाचा च द्वयमत्र जिहासितम्।**

**ताद्रूप्येण परिच्छित्तिस्तद्विपर्ययतोऽपि वा ।।’’**[9]

एवं च यः शब्दः स्वविषयकज्ञानेन मानान्तराप्राप्ताबाधितार्थज्ञानं जनयति। स शब्दप्रमाणमित्युक्तं भवति। बाधितविषयक ज्ञानमेव विषयत्वे सति शब्दत्वं शब्दप्रमाणलक्षणमिति फलितम्

**शास्त्रदीपिकायां शब्दलक्षणस्य विवरणम्-**

शास्त्रदीपिकायां ‘‘शास्त्रं शब्दविज्ञानादसंनिकृष्टेऽर्थे विज्ञानमिति। विज्ञातात् शब्दात् पदार्थाभिधानद्वारेण यद्वाक्यार्थविज्ञानं तच्छाब्दं नाम प्रमाणम् । तल्लोक सिद्धत्वात्र परीक्षितव्यम्। । तच्च द्विविधम्, पौरुषेयमपौरुषेयं चेति । तत्र पौरुषेयमाप्तवाक्यम्। अपौरुषेयं च वेदवाक्यम्। उभयमप्यनाप्तप्रणीतत्वदोषविरहात् स्वतश्च शब्दस्यादुष्टत्वात् प्रमाणम्’’ इति।

[9] शा.भा. 1-1-5, भा.1. पृ- 44

International Journal of Research in Economics and Social Sciences(IJRESS)
Available online at: http://euroasiapub.org
Vol. 9 Issue 3, March- 2019
ISSN(o): 2249-7382 | Impact Factor: 6.939
**(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)**

अनेन पदार्थाभिधानद्वारा वाक्यार्थज्ञानजनकज्ञानविषयत्वं शब्दप्रमाणलक्षणम् इति।

श्लोकवार्त्तिके- भाष्यकारेण ‘‘शास्त्रं शब्दविज्ञानादसंनिकृष्टेऽर्थे विज्ञानम्’’ इति शब्दविशेषस्य शास्त्रस्यैव लक्षणमुक्तम्, कुतः शब्दसामान्यस्य लक्षणं नोक्तम् इत्याशङ्क्य लौकिकवाक्यलक्षणस्य वेदव्याख्याने नातीव उपयोगः । अपि च सामान्यमन्तरेण विशेषाभावात् विशेषलक्षणे कथिते, ततः सामान्यलक्षणं सुखग्राह्यमित्याशयेन भाष्यकारः शब्दप्रमाणसामान्यलक्षणं नोक्तवान् इति समाधाय -

**... तस्माच्छब्देन या मतिः।**

**तस्याः स्वतः प्रमाणत्वं न चेत् स्याद्दोषदर्शनम् ॥**[10]

इति ग्रन्थेन दोषदर्शनरहितशब्दविज्ञानात् असंनिकृष्टे अनधिगतेऽबाधिते च, वाक्यार्थे यत् ज्ञानं, तत्साधनं शब्दप्रमाणमिति प्रदर्शितम्। ‘‘आप्तोपदेशः शब्दः ‘‘ इति लक्षणं तु अपौरुषेये वेदेऽव्याप्तमिति।

[10] श्लो.वा.शब्द. 53